लोकप्रियसाहित्यग्रन्थमाला-35

पं. प्रेमनारायणद्विवेदिरचनावलिः

द्वितीयो भागः

# सप्तशतीसङ्ग्रहः

सम्पादकः

डॉ. ऋषन्भारद्वाजः ( ऋषभः )

राष्ट्रियसंस्कृतसंस्थानम्

नवदेहली

# सम्पादकीयम्

विद्याविनयसम्पन्नः मध्यप्रदेशस्थ- सागरनगरवास्तव्यः राष्ट्रपतिसम्मानेन सभाजितः पं. प्रेमनारायणद्विवेदी वीणावादिन्याः देव्याः सरस्वत्याः "**मौनसाधक**" आसीत्। वाराणसीतः उच्चशिक्षामवाप्य गृहं समागतः द्विवेदिवर्यः स्वकीयाजीविकारूपेण अध्यापनकार्यम् अङ्गीकृतवान्। करुणामयहृदयस्यास्य कवेः वैदिकसंस्कृतौ ईश्वरे च आसीत् दृढीयान् विश्वासः। "**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**" इति शास्त्रवचनमनुसृत्य अनेन महात्मना वाराणस्यां गुरुभ्यः वेदशास्त्राणि अधीतानि। अधीतानां शास्त्राणां गृहेऽपि सततं स्वाध्यायं कुर्वता तेन "**स्वाध्यायान्मा प्रमदः**" इति वेदवचनम् आजीवनमाचरितम्। हस्तसञ्चालनसहितं सस्वरं वेदपाठं स न केवलं जानाति स्म करोति स्म च अपितु शिष्यान् अध्यापयति स्म। सः प्रायः वैदिकसाहित्यं वेदान्तग्रन्थान् च अनुशीलयति स्म। अस्मिन्नेव क्रमे तेन केषाञ्चन वैदिकसूक्तानां संस्कृतेन सुष्ठु अनुवादः कृतः।

यथा प्राच्यसाहित्यानुशीलने तस्य सहजा प्रवृत्तिः आसीत् तथैव अन्यासां भाषाणां काव्यानां संस्कृतेन अनुवादे तस्य महती रुचिः आसीत्। तस्य अनूदितकाव्यानां मौलिककाव्यानां च सर्वमाहत्य पद्यानि एकविंशतिसहस्राद् ( 21000 ) अधिकानि सन्ति। श्री तुलसीकवेः श्रीसूरदासकवेश्च ग्रन्थानामनुवादः द्विवेदिवर्यस्य अनुवादकर्मणि दक्षतां नितरां प्रमाणयति। श्रीमद्रामचरितमानसस्य तेन कृतः संस्कृतानुवादः अनुवादपुरस्कारेण (2009ई.) पुरस्कृतः। श्रीतुलसीकवेः श्रीसूरदासकवेश्च येषां ग्रन्थानां तेन अनुवादः कृतः तेषु श्रीमद्रामचरितमानसं विहाय सर्वे अप्रकाशिताः सन्ति।

द्विवेदिवर्यस्य अप्रकाशितग्रन्थानां प्रकाशनस्य सङ्कल्पनायां पं. प्रेमनारायणद्विवेदिरचनावल्याः प्रथमो भागः "काव्यसङ्ग्रहः"

परोपकाराद् विरतिर्हि मौर्ख्याद्
ग्राम्येषु भोगेषु रतिश्च नित्यम्।
अयं हि धर्मो न हि मानवीयः
संसारगर्ते पतनं तवैतत्।।372।।

गेहस्थितेन दीपेन यथा मार्गः प्रकाशितः।
भासयतीन्द्रियाण्यन्तः प्रकाश्य भगवाँस्तथा।।373।।

न जानाति मालां यथा गौर्गले स्वे
स्थितां वा च्युतां नैव चिन्तां करोति।
निजानन्दमग्नस्तथा कर्मबद्धं
विवेकी न जानाति देहं स्वकीयम्।।374।।

भोगान् प्राप्य जनो न योऽत्र विविधान् गृह्णाति पूर्णो ह्यसौ
नीत्वा चाथ ददाति योऽन्यपुरुषेभ्योऽर्धो नरः कथ्यते।
मूर्खोऽसौ मधुमक्षिकेव कृपणस्त्वादाय दत्ते न यो
यो गृह्णाति बलाच्छठतमः कोऽसौ न जानीमहे।।375।।

इमे यन्त्रभूता अनेके महार्हान्
पदार्थांश्च भुक्त्वा वृथा नाशयन्ति।
अधर्मं न धर्मं च जानन्ति किञ्चित्
सदाचारहीनाः पशुभ्योऽपि हीनाः।।376।।

वासनाव्योमगं तावन् मन उड्डीयते ध्रुवम्।
ज्ञानश्येनेन नो यावद् गृहीतं प्रबलेन हि।।377।।

तण्डुलेच्छा हि सर्वेषां तण्डुलेभ्यो न तण्डुलाः।
न केचित्तुषमिच्छन्ति सतुषेभ्यो हि तण्डुलाः।।378।।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058